## द्वितीयः पाठः

# अलसस्य स्वप्नः

एषा कथा श्री विष्णुशर्मणः विश्वप्रसिद्धकथाग्रन्थस्य पञ्चतन्त्रस्य 'अपरीक्षितकारकात्' बालकानाम् अवबोधनार्थं सङ्कलिता।

कस्मिंश्चिन्नगरे कश्चित् स्वभावकृपणः विप्रः प्रतिवसति स्म। तेन भिक्षार्जितैः भुक्तशेषैः सक्तुभिः कलशः सम्पूरितः। तं च घटं नागदन्ते अवलम्ब्य, तस्याधस्तात् खट्वां निधाय सततम् एकदृष्ट्या तम् अवलोकयति।

अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास-यत् अयं घटः सक्तुभिः परिपूर्णः वर्तते। तद्यदि दुर्भिक्षं भवति, तदनेन रुप्यकाणां शतमुत्पत्स्यते। ततस्तेन मया अजाद्वयं ग्रहीतव्यम्। ततः षाण्मासिकात् आप्रसववशात् ताभ्यां यूथं भविष्यति। ततोऽजाभिः प्रभूता गाः गृहीष्यामि। गोभिर्महिषीः। महिषीभिर्वडवा। वडवाप्रसवतः प्रभूता अश्वा भविष्यन्ति। तेषां विक्रयात् प्रभूतं सुवर्णं भविष्यति। सुवर्णेन चतुःशालं गृहं सम्पत्स्यते।

ततः कश्चिद् विप्रः मम गृहम् आगत्य रूपाढ्यां कन्यां मह्यं दास्यति। तत्सकाशात् पुत्रो मे भविष्यति। तस्य अहं "सोमशर्मा" इति नाम करिष्यामि। ततः तस्मिञ्जानुचलन-योग्ये सञ्जाते अहं पुस्तकं गृहीत्वा अश्वशालायाः पृष्ठदेशे उपविष्टस्तदवधारयिष्यामि। अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गात् जानुचलनपरः अश्वखुरासन्नवर्ती मत्समीपमागमिष्यति। ततोऽहं स्वपत्नीं कोपाविष्टोऽभिधास्यामि- "गृहाण तावद् बालकम्"। सा अपि गृहकर्मव्यग्रतयाऽस्मद्वचनं न श्रोष्यति। ततोऽहं समुत्थाय तां ताडयिष्यामि।

एवं तेन ध्यानस्थितेन तथैव प्रहारो दत्तो यथा स घटो भग्नः स्वयं च पाण्डुरतां गतः।

अतोऽहं ब्रवीमि -

**अनागतवतीं चिन्ताम् असम्भाव्यां करोति यः।**
**स एव पाण्डुरः शेते सोमशर्मपिता यथा॥**

### शब्दार्थः

| | | |
|---|---|---|
| स्वभावकृपणः | - | स्वभाव से ही कंजूस। |
| भिक्षार्जितैः | - | भीख से इकट्ठे किये गये |
| भुक्तशेषैः | - | खाने से बचे हुए |
| सक्तुभिः | - | सत्तू (गेहूँ, जौ, चने को सेक कर बना आटा) से |
| नागदन्ते | - | खूँटी पर |
| खट्वाम् | - | खाट को |
| दुर्भिक्षम् | - | अकाल |
| अजाद्वयम् | - | दो बकरियाँ |
| षाण्मासिकात् | - | छः महीने में होने से |
| यूथम् | - | झुण्ड |

| | | |
|---|---|---|
| वडवा | – | घोड़ी |
| चतु:शालम् | – | चौकोर घर, बरामदा |
| रूपाढ्याम् | – | रूपवती, सुन्दरी |
| जानुचलनयोग्ये | – | घुटने से चलने योग्य होने पर |
| अश्वशालाया: | – | घुड़साल के |
| उत्सङ्गात् | – | गोद से |
| भग्न: | – | टूट गया |
| पाण्डुरताम् | – | पीले रंग को |
| अनागतवतीम् | – | न आयी हुई को |
| असम्भव्याम् | – | असम्भव |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) विप्रः पुत्रस्य नाम किं चिन्तितवान् ?

(ख) सक्तुभि: कति रुप्यकाणि उत्पत्स्यन्ते ?

(ग) विप्र: कं सततम् अवलोकयति ?

(घ) अश्वानां विक्रयात् किं भविष्यति ?

(ङ) विप्रस्य प्रहारेण क: भग्न: ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) विप्र: स्वपत्नीं किम् अभिधास्यति ?

(ख) घट: कै: सम्पूरित: ?

(ग) सुवर्णेन किं सम्पत्स्यते ?

(घ) सोमशर्मा कुत: विप्रसमीपम् आगमिष्यति ?

(ङ) विप्र: गोभि: का: गृहीष्यति ?

### (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) सोमशर्मा पितरं दृष्ट्वा किं करिष्यति ?

(ख) विप्र: रात्रौ सुप्त: किं चिन्तयामास ?

(ग) विप्र: कं कदा कुतश्च अवधारयिष्यति ?

(घ) यदा दुर्भिक्षं भविष्यति तदा सक्तुभि: किं-किं भविष्यति ?

(ङ) 'अलसस्य स्वप्न' कथाया: आशय: क: ?

## ( 4 ) उदाहरणानुसारं शब्दानां धातुं प्रत्ययं च पृथक् कुरुत –

| | शब्दः | धातुः | प्रत्ययः |
|---|---|---|---|
| यथा | गतः | गम् | क्त |
| (क) | दत्तः | | |
| (ख) | भग्नः | | |
| (ग) | दृष्ट्वा | | |
| (घ) | गृहीत्वा | | |
| (ङ) | आगत्य | आ + | |

## ( 5 ) अव्ययैः वाक्यनिर्माणं कुरुत –

यथा – सः <u>अत्र</u> अस्ति।

(क) च

(ख) अपि

(ग) तावत्

(घ) न

(ङ) ततः

## ( 6 ) उदाहरणानुसारं शब्दानां विभक्तिं वचनं च लिखत –

| | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा | बालकम् | द्वितीया विभक्तिः | एकवचनम् |
| (क) | अजाभिः | | |
| (ख) | नागदन्ते | | |
| (ग) | मह्यम् | | |
| (घ) | तस्य | | |
| (ङ) | अहम् | | |

## ( 7 ) सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत –

(क) तद्यदि -------- + -------- = -------- ।

(ख) कदाचिद्रात्रौ -------- + -------- = -------- ।

(ग) तदनेन -------- + -------- = -------- ।

(घ) कश्चित् -------- + -------- = -------- ।

(ङ) तथैव -------- + -------- = -------- ।

## ( 8 ) क्रियापदानां धातुं लकारं पुरुषं च लिखत –

| | क्रियापदम् | धातुः | लकारः | पुरुषः |
|---|---|---|---|---|
| यथा | श्रोष्यति | श्रु | लृट्लकारः | प्रथमपुरुषः |
| (क) | भविष्यति | | | |
| (ख) | करिष्यामि | | | |
| (ग) | दास्यति | | | |
| (घ) | ग्रहीष्यामि | | | |
| (ङ) | ताडयिष्यामि | | | |

## ( 9 ) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत –

(क) अजाभिः महिषीः भविष्यन्ति। ☐

(ख) विप्रः घटं सततमेकदृष्ट्या अवलोकयति। ☐

(ग) वडवाप्रसवतः अश्वा भविष्यन्ति। ☐

(घ) कलशः सक्तुभिः सम्पूरितः। ☐

(ङ) अश्वानां विक्रयात् गृहं सम्पत्स्यते। ☐

## ( 10 ) रिक्तस्थानानि पूरयत –

(क) स एव पाण्डुरः शेते . . . . . . . . . . . . . पिता यथा।

(ख) सुवर्णेन . . . . . . . . . . . . . . गृहं सम्पत्स्यते।

(ग) अजाभिः प्रभूता . . . . . . . . . . . . . गृहीष्यामि।

(घ) तस्य अहं . . . . . . . . . . . . . . इति नाम करिष्यामि।

(ङ) वडवा प्रसवतः प्रभूता . . . . . . . . . . . . . भविष्यन्ति।

## ( 11 ) यथायोग्यं योजयत –

| | ( अ ) | ( आ ) |
|---|---|---|
| (क) | वडवा | शतरुप्यकाणि |
| (ख) | सक्तुभिः | पञ्चतन्त्रम् |
| (ग) | अजाद्वयम् | अश्वाः |
| (घ) | विष्णुशर्मा | पुत्रः |
| (ङ) | सोमशर्मा | यूथम् |

## योग्यताविस्तारः –

- पञ्चतन्त्रस्य अन्यां कथां लिखत।
- अलसस्य स्वप्नः इति कथायाः सारं शिक्षां च स्वशब्देषु लिखत।

❖ ❖ ❖